द्वादशनाम पंजरम्

पुरस्तात् केशवः पातु चक्री जांबूनद प्रभः ।

पश्चात् नारायणः शंखी नीलजीमूत सन्निभः ॥ १ ॥

इन्दीवरदल श्यामो माधवोर्ध्वं गदाधरः ।

गोविन्दो दक्षिणे पर्श्वे धन्वी चन्द्रप्रभो महान् ॥ २ ॥

उत्तरे हलभृद् विष्णुः पद्मकिंजल्क सन्निभः ।

आग्नेय्या मरविन्दाभो मुसली मधुसूदनः ॥ ३ ॥

त्रिविक्रमः खड्गपाणिर्नि ऋत्यां ज्वलन प्रभः ।

वायव्यां वामनो वज्री तरुणादित्य दीप्तिमान् ॥ ४ ॥

ऐशान्यां पुण्डरीकाक्षः श्रीधरः पट्टसायुधः ।

विद्युत्प्रभो हृषीकेशः ह्यवाच्यां दिशि मुद्गरी ॥ ५ ॥

हृत्पद्मे पद्मनभो मे सहस्राार्क सम प्रभः ।

सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतोमुखः ॥ ६ ॥

इन्द्रगोपक संकाशः पाशहस्तोऽपराजितः ।

स बाह्याभ्यन्तरं देहं व्याप्य दामोदरः स्थितः ॥ ७ ॥

एवं सर्वत्र मच्छिद्रं नाम द्वादश पंजरम् ।

प्रविष्टोऽहं न मे किंचिद् भयमस्ति कदाचन ॥ ८ ॥

॥ भयन्नास्ति कदाचन ओं नम इति ॥

आपदाम् अपहर्तारं दातारं सर्वसंपदाम् ।

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ९ ॥

आर्तानाम् आर्तिहन्तारं भीतानां भीति नाशनम् ।

द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ॥ १० ॥

नमः कोदण्ड हस्ताय सन्धीकृत शराय च ।

खण्डिताखिल दैत्याय रामायापन्निवारिणे ॥ ११ ॥

रामाय राम भद्राय रामचन्द्राय वेधसे ।

रघुनाथाय नाथाय सीतायाः पतये नमः ॥ १२ ॥

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ।

आकर्ण पूर्ण धन्वानौ रक्षेतां रामलक्ष्मणौ ॥ १३ ॥

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।

गच्छन् ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥ १४ ॥

अच्युतानन्त गोविन्द नामोच्चारण भेषजात् ।

नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ १५ ॥

सत्यं सत्यं पुनस्सत्य मुद्धृत्य भुजमुच्यते ।

वेदाच्छास्त्रं परं नास्ति न दैवं केशवात् परम् ॥ १६ ॥

शरीरे जर्झरी भूते व्याधि ग्रस्ते कलेबरे ।

औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः ॥ १७ ॥

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।

इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा ॥ १८ ॥

कायेन वाचा मनसेन्द्रियैर्वा

बुद्ध्यात्मना वा प्रकृतेःस्वभावात् ।

करोमि यद्यत् सकलं परस्मै

श्रीमन्नारायणायेति समर्पयामि ॥ १९ ॥

यदक्षर पदभ्रष्टं मात्रा हीनन्तु यद्भवेत्

तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते

विसर्ग बिन्दु मात्राणि पदपादाक्षराणि च

न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥ २० ॥

सर्वं श्री कृष्णार्पणम् अस्तु ।